"अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु" ।)
पञ्चन्यायावयवान्तर्गतमिदम् ॥ (नाट्यशास्त्रे सोत्कर्षवचनोपन्यासरूपो गर्भाङ्गभेदः । यदुक्तं साहित्यदर्पणे ६ष्ठ परिच्छेदे ।
"उदाहरणमुत्कर्षयुक्तं वचनमुच्यते" ।
यथा, वेणीसंहारे अश्वत्थामाङ्के ॥
"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात्पाण्डवीनां चमूनां, यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा । यो यस्तत्कर्म्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः, क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्" ॥
षट्त्रिंशन्नाटकलक्षणान्तर्गतलक्षणभेदः । यथा, साहित्यदर्पणे ६ष्ठ परिच्छेदे ।
"यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात् ।
साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम् ॥)

उदाहारः, पुं, (उत् + आ + हृ + घञ् ।) उदाहरणम् । इत्यमरः ॥ प्रकृतोपपादकदृष्टान्तादिः । इति भरतः ॥ युक्तिप्राप्तार्थनिदर्शनं इति साङ्ख्यः ॥ प्रकृतसिद्धार्था चिन्ता । इति रायमुकुटः ॥

उदितः, त्रि, (वद् + क्त । यद्वा । उत् + इण् + क्त ।) उक्तः । (यथा, किराते । १ । २८ ।
"भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम्" ॥)
बद्धः । इत्यमरः ॥ उद्गतः । प्राप्तोदयः । इति मेदिनी ॥ (यथा, रामायणे ।
"उदयादुदितं दीप्तं ज्वालापिङ्गसमप्रभम्" ॥
"उदितेऽनुदिते चैव समयाध्युषिते तथा" ।
इति मनुः । २ । १५ ॥ तथा, किराते । ५ । ५ ।
"दधतमुच्चशिलान्तरगोपुराः,
पुर इवोदितपुष्पवना भुवः" ॥)

उदितोदितः, त्रि, (उदिते कथिते शास्त्रे उदितः अभ्युदितः ।) शास्त्रज्ञः । इति स्मृतिः ॥
("पुरोहितञ्च कुर्व्वीत दैवज्ञमुदितोदितम् ।
दण्डनीत्याञ्च कुशलमथर्व्वाङ्गिरसे तथा" ॥
इति याज्ञवल्क्यः ॥)

उदीची, स्त्री, (उत् उत्तरं अञ्चत्यर्कं । उत्क्रान्तं दृष्टिपथं अञ्चति सूर्य्यं वा । उद इदित्यञ्चेरत ईकारः । ऋत्विगादिना क्विन् । उगितश्चेति ङीप् ।) उत्तरा दिक् । इत्यमरः ॥
("यदोदीच्यां गतिर्भानोस्तदा सूर्य्यबलाधिकम्" ॥
इति हारीतोक्ते प्रथमस्थाने चतुर्थेऽध्याये ॥)

उदीचीनं, त्रि, (उदीची + ख ।) उदीच्यां भवं । उत्तरदिग्जातवस्तु । इति हेमचन्द्रः ॥ (यथा, शतपथब्राह्मणे १३ । ८ । १ । ६ । "उदीचीनप्रवणं करोत्युदीची वै मनुष्याणां दिक्" ॥)

उदीच्यं, क्ली, (उदीच्यां भवम् । उदीची + यत् ।) बालकनामगन्धद्रव्यं । इत्यमरः ॥ बाला इति ख्यातम् । (बालकशब्देऽस्य गुणादयो बोद्धव्याः ॥)

उदीच्यः, पुं, (उदीच्यां भवः । उदीची + यत् ।) शरावतिनद्याः पश्चिमोत्तरदेशः । इत्यमरः ॥ (तद्देशवासिनि त्रि, यथा, रघौ ४ । ६६ ।
"शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव" ॥
तथा, महाभारते युधिष्ठिरप्रबोधने ८ । ७० । ३४ ॥
"हता उदीच्या निहताः प्रतीच्याः
प्राच्या निरस्ता दाक्षिणात्या विशस्ताः" ॥)

उदीरणं, क्ली, (उत् + ईर + ल्युट् ।) कथनम् । इति हलायुधः ॥ (यथा, कुमारे २ । १२ ।
("उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्" ॥
प्रेरणम् । क्षेपणम् ।
"शङ्खाक्षोदीरणात् शत्रौर्देवदानवकिन्नराः" ।
इति महाभारते ॥)

उदीर्णः, त्रि, (उत् + ॠ + क्त ।) उदारः । महान् । इति जटाधरः ॥
("न हि राज्ञामुदीर्णानामेवम्भूतैर्नरैः क्वचित् ।
सख्यं भवति मन्दात्मन् ! श्रिया हीनैर्धनच्युतैः" ॥
इति महाभारते ॥ उत्तेजितः । उद्दीपितः । उद्धतः । यथा, कुमारे २ । ३२ ।
"भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः" ।
"ब्रह्म क्षत्रेण संसृष्टं क्षत्रं च ब्रह्मणा सह ।
उदीर्णौ दहतः शत्रून् वनानीवाग्निमारुतौ" ॥
इति महाभारते । पुं, विष्णुः । यथा, महाभारते विष्णुसहस्रनामकथने १३ । १४९ । ८० ।
"उदीर्णः सर्व्वतश्चक्षुरनीशः शाश्वतः स्थिरः" ॥)

उदुम्बरं, क्ली, (उं शम्भुं वृणोतीति उम्बरम् । उ + वृ + संज्ञायां खच् । अरुर्द्विषदिति मुम् । उत्कृष्टमुम्बरम् ।) ताम्रम् । इत्यमरः ॥ (ताम्रशब्देऽस्य विशेषो ज्ञेयः ॥)

उदुम्बरः, पुं, उडुम्बरवृक्षः । यज्ञडुमुर इति भाषा । तत्पर्य्यायः । क्षीरवृक्षः २ हेमदुग्धः ३ सदाफलः ४ कालस्कन्धः ५ यज्ञयोग्यः ६ यज्ञीयः ७ सुप्रतिष्ठितः ८ शीतवल्कः ९ जन्तुफलः १० पुष्पशून्यः ११ पवित्रकः १२ सौम्यः १३ शीतफलः १४ । अस्य पक्वफलगुणाः । मधुरत्वम् । हिमत्वम् । क्रिमिकारित्वम् । रक्तपित्तहरत्वमूर्च्छादाहनाशित्वञ्च । अस्य सुपक्वफलगुणाः । अतिशयशीतलत्वम् । मधुरत्वम् । पित्तश्रमशोषहारित्वञ्च । अस्यामफलगुणाः । कषायत्वम् । अग्निदीपनत्वम् । रक्तविकारित्वञ्च ॥ अस्य त्वग्गुणाः । शीतत्वम् । कषायत्वम् । व्रणनाशित्वम् । गर्भिणीगर्भसंरक्षकत्वम् । स्तनदुग्धदातृत्वञ्च । इति राजनिर्घण्टः ॥
(अस्य पर्य्यायगुणौ यथा ।
"उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
उदुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ॥
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ म भागे वटादिवर्गे ॥ अस्य फलगुणांश्चाह चरकः सूत्रस्थाने सप्तविंशेऽध्याये यथा,—
"अश्वत्थोदुम्बरप्लक्षन्यग्रोधानां फलानि च ।
कषायमधुराम्लानि वातलानि गुरूणि च ॥ • ॥)
कुष्ठविशेषः । देहली । गोबराटेर नीचेर काठ् इति भाषा । षण्ढकः । नपुंसकं । इति हेमचन्द्रः ॥

उदुम्बरदला, स्त्री, (उदुम्बरस्य दलमिव दलमस्याः ।) दन्तीवृक्षः । इति राजनिर्घण्टः ॥ (अस्या गुणादयो दन्तीशब्दे ज्ञेयाः ॥)

उदुम्बरपर्णी, स्त्री, (उदुम्बरस्य पर्णमिव पर्णमस्याः ।) उडुम्बरपर्णी । दन्तिकावृक्षः । इत्यमरः ॥ (अस्याः पर्य्यायान्तरं कल्पस्थाने १२ अध्याये उक्ताः । यथा,—
"दन्त्युदुम्बरपर्णी स्यान्निकुम्भोऽथ मुकूलकः" ॥)

उदूखलं, क्ली, (उदूर्द्ध्वं तत् खञ्च । तत् लाति । आतोऽनुपेति कः । पृषोदरादित्वात् साधुः ।) गुग्गुलुः । इति मेदिनी ॥ तण्डुलकण्डनार्थकाष्ठनिर्म्मितपात्रम् । उखलि इति भाषा । तत्पर्य्यायः । उलूखलं २ । इत्यमरः ॥ ("संकुच्योदूखले विद्वान्" इत्यादिप्रयोगो भावप्रकाशादौ द्रष्टव्यः ॥)

उदूढः, त्रि, (उत् + वह + क्त ।) ऊढः । स्थूलः । इति मेदिनी ॥ (यथा, माघे । १ । ३६ ।)
"उदूढलोकत्रितयेन साम्प्रतम्
गुरुर्धरित्री क्रियतेतरां त्वया" ॥)

उद्गतं, त्रि, (उत् + गम + क्त ।) उद्वान्तम् । छर्द्दितवस्तु । इत्यमरः ॥ ऊर्द्ध्वगतम् । उदितम् ॥

उद्गमः, पुं, (उत् + गम + अप् ।) ऊर्द्ध्वगमनम् । उदयः ॥ (आविर्भावः । यथा, कुमारे । ७ । ७७ ॥
"रोमोद्गमः प्रादुरभूदुमायाः
स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत्" ।
"फलेन सहकारस्य पुष्पोद्गम इव प्रजाः" ॥
इति रघुवंशे । ४ । ९ ॥ प्रस्थानं वहिर्गमनम् ।
"तनयानां क्षुधार्त्तानां पश्यन् प्राणोद्गमव्यथाम्" ।
इति कथासरित्सागरे ४ तरङ्गे ॥)

उद्गमनीयं, क्ली, (उत् + गम + अनीयर् ।) धौतवस्त्रद्वयं । इत्यमरः ॥ धोया योड़ इति भाषा ।
("सा मङ्गलस्नानविशुद्धगात्री
गृहीतपत्युद्गमनीयवस्त्रा" ।
इति कुमारे । ७ । ११ ॥)

उद्गाढ़ं, क्ली, (उत् + गाह + क्त ।) अतिशयः । तद्युक्ते त्रि । इत्यमरः ॥ ("प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढ़रागोदयाः" । इति साहित्यदर्पणे । ३य परिच्छेदे ॥)

उद्गाता, [ऋ] पुं, (उद्गायति साम यः । उत् + गै + तृच् ।) सामवेदज्ञः । सामवेदविद्ब्राह्मणः इत्यमरः ॥
("ब्रह्माणं परमं वक्त्रादुद्गातारञ्च सामगम् ।
होतारमथ चाध्वर्य्युं बाहुभ्यामसृजत्प्रभुः" ॥
इति हरिवंशे । तथा च मनुः । ८ । २०९ ।
"होता वापि हरेदश्वमुद्गाता चाप्यनः क्रये" ॥
"उद्गातृहोत्रब्रह्माणो यथाध्वर्य्युं विनाध्वरे" ।
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशेऽध्याये ॥)

उद्गारः, पुं, (उत् + गॄ + घञ् ।) उद्वमनम् । इत्यमरः ॥ (यथा, रघौ । ६ । ६० ।
"आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः" ॥)
शब्दः । इति भरतः ॥ (यथा महाभारते ३ ।
"तस्य शार्दूलनिनदं पर्व्वतः स गुहामुखैः ।
उद्गारमिव गौर्नद्यमुत्ससर्ज समन्ततः" ॥)
कण्ठगर्ज्जनं । इति जटाधरः । ढेकुर इति भाषा । तत्तु नागवायुकर्म्म । इति श्रीधरस्वामी ॥ (स्रावः ।